"सोऽपि तां वीक्ष्य लावण्यरसनिर्झरिणीं नृपः ।
यत्र प्राप परिष्वङ्गं स्मराक्रान्तो मुमूर्च्छ तत् ॥")

निर्णयः, पुं, (निर्णयनमिति । निर् + नी + "एरच् ।" ३ । ३ । ५६ । इति भावे अच् ।) अवधारणम् । तत्पर्य्यायः । निश्चयः २ । इत्यमरः । ३ । ५ । ३ ॥ निर्णयनम् ३ निश्चयः ४ । इति शब्दरत्नावली ॥ (यथा, मनुः । १२ । २ ।
"स तानुवाच धर्म्मात्मा महर्षीन् मानवो भृगुः ।
अस्य सर्व्वस्य शृणुत कर्म्मयोगस्य निर्णयम् ॥")
विचारः । तत्पर्य्यायः । तर्कः २ शुद्धा ३ चर्च्चा ४ । इति त्रिकाण्डशेषः ॥ विरोधपरिहारः । इति मिताक्षरा ॥ चतुष्पाद्व्यवहारान्तर्गतशेषपादः । जयपत्रा इति भारतीयभाषा ॥ डिक्री इति इङ्गरेजीयभाषा ॥ तद्विवरणं यथा । "अथ निर्णयः । तत्र नारदः ।
'यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् ।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः ॥
स्वयमभ्युपपन्नोऽपि स्वचर्य्यावसितोऽपि सन् ।
क्रियावसन्नोऽप्यर्हेत परं सभ्यावधारणम् ॥
सभ्यैरवहृतः पश्चात् राज्ञा शास्यः स शास्त्रतः ॥'
यस्य वादिनः प्रतिवादिनो वा साक्षिण इत्युपलक्षणम् । साक्षिलिखितभुक्तिशपथानां मध्येऽन्यतमप्रमाणं यस्य प्रतिज्ञायाः सत्यत्वप्रतिपादकं स एव जयी अन्यथा पराजित इति प्रत्येतव्यम् । स्वयमभ्युपपन्नः आत्मनैवाङ्गीकृतस्वपराजयः । स्वचर्य्यावसितः कम्पस्वेदवैवर्ण्यादिना पराजितत्वेनावधृतः । क्रियावसन्नः साक्ष्यादिना प्राप्तपराजयः । परमनन्तरम् । सभ्यावधारणं सभासदां मिलितानामयं पराजित इति निर्णयं अर्हेत । स शास्त्रविधिना शास्यः ॥ * ॥ निर्णयस्य फलमाह बृहस्पतिः ।
'प्रतिज्ञाभावनाद्वादी प्राड्विवाकादिपूजनात् ।
जयपत्रस्य चादानात् जयी लोके निगद्यते ॥'
जयपत्रस्य लेखनप्रकारमाह स एव ।
'यद्वृत्तं व्यवहारेषु पूर्व्वपक्षोत्तरादिकम् ।
क्रियावधारणोपेतं जयपत्रेऽखिलं लिखेत् ॥
पूर्व्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः ।
प्रदद्याज्जयिने पत्रं जयपत्रं तदुच्यते ॥'
कात्यायनः ।
'अर्थिप्रत्यर्थिवाक्यानि प्रतिसाक्षिवचस्तथा ।
निर्णयश्च तथा तस्य यथा चावधृतं स्वयम् ॥
एतद्यथाक्षरं लेख्यं यथापूर्व्वं निवेशयेत् ।
सभासदश्च ये तत्र धर्म्मशास्त्रविदस्तथा ॥'
तत्र च भाषोत्तरे क्रिया च पक्षसाक्ष्यादिकं निर्णयो जयपराजयावधारणं निर्णयकालावस्थितसभ्यनामानि इत्यादिकं सर्व्वं लेखनीयं निरूपणस्य सम्यक्प्रदर्शनार्थम् । तथाहि भाषोत्तरलेखनं छलान्तरेण पुनर्न्यायप्रत्यवस्थाननिषेधार्थम् । यदि न गृहीतमिति मिथ्योत्तरेण पराजितस्य पुनः परिशोधितं मयेति प्रत्यवस्थानं सम्भवति । प्रमाणलेखनन्तु पुनः प्रमाणान्तरोपन्यासनिरासार्थम् । तदाह कात्यायनः ।
'क्रियां बलवतीं त्यक्त्वा दुर्ब्बलां योऽवलम्बते ।
स जयेऽवधृते सभ्यैः पुनस्तां नाप्नुयात् क्रियाम् ॥
निर्णीते व्यवहारे तु प्रमाणमफलं भवेत् ।
लिखितं साक्षिणो वापि पूर्व्वमावेदितं न चेत् ॥
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः ।
निर्णीतव्यवहाराणां प्रमाणमफलन्तथा ॥'
निर्णयोत्तरकृत्यमाह मनुः ।
'अर्थेऽपव्ययमानन्तु करणेन विभावितम् ।
दापयेद्धनिकस्यार्थं दण्डलेशञ्च शक्तितः ॥'
अपव्ययमानं अपलपन्तम् । करणेन साक्ष्यादिप्रमाणेन । याज्ञवल्क्यः ।
'ज्ञात्वापराधं देशञ्च कालं बलमथापि वा ।
वयः कर्म्म च वित्तञ्च दण्डं दण्ड्येषु दापयेत् ॥' * ॥
मनुः ।
'तीरितं चानुशिष्टञ्च यत्र क्वचन यद्भवेत् ।
कृतं तद्धर्म्मतो विद्यात् न तद्भूयो निवर्त्तयेत् ॥'
अनुशिष्टं साक्ष्यादिनिर्णीतम् । अतएव तीरितं प्राड्विवाकादिभिः समापितम् । तद्विवादपदं पुनर्न निवर्त्तयेदित्यर्थः ॥ यत्र तु तीरितानुशिष्टयोरप्यधर्म्मेणतत्त्वम्मत्वा पराजयी पुनर्द्विगुणदण्डमङ्गीकृत्य प्रत्यवतिष्ठते तत्र पुनर्न्यायदर्शनमाह नारदः ।
'तीरितं चानुशिष्टञ्च यो मन्येत विधर्म्मतः ।
द्विगुणं दण्डमादाय तत् कार्य्यं पुनरुद्धरेत् ॥'
असद्विचारे तु विचारान्तरमाह स एव ।
'असाक्षिकन्तु यद्दृष्टं विमार्गेण च तीरितम् ।
असम्मतमतैर्दृष्टं पुनर्दर्शनमर्हति ॥'
असाक्षिकमित्यप्रमाणोपलक्षणम् ॥ * ॥
याज्ञवल्क्यः ।
'दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान् नृपेण तु ।
सभ्याः सजयिनो दण्ड्या विवादाद्द्विगुणं दमम् ॥
साक्षिसभ्यावसन्नानां दूषणे दर्शनं पुनः ।
स्वचर्य्यावसितानान्तु नास्ति पौनर्भवो विधिः ॥'
साक्षिवचनेन सभ्यावधारितेन च प्राप्तावसादानां दोषदर्शने पुनर्न्यायदर्शनम् । स्वव्यापारेण विरुद्धभाषादिना प्राप्तावसादानान्तु नास्ति पुनर्न्यायः ॥ बृहस्पतिरपि ।
'पलायनानुत्तरत्वादन्यपक्षाश्रयेण च ।
हीनस्य गृह्यते वादो न स्ववाक्यजितस्य च ॥'
मनुः ।
'बलाद्दत्तं बलाद्भुक्तं बलाद्वा लिखितञ्च यत् ।
सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीत् ॥'
याज्ञवल्क्यः ।
'बलोपाधिविनिर्वृत्तान् व्यवहारान्निवर्त्तयेत् ।
स्त्रीनक्तमन्तरागारबहिर्ग्रामकृतांस्तथा ॥
मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः ।
असम्बन्धकृतश्चैव व्यवहारो न सिध्यति ॥'
उपाधिश्छलमिति शूलपाणिः । उपाधिर्भयादिरिति विज्ञानेश्वरः । तन्मते भीतादियोजित इत्युक्तवचनेन पौनरुक्त्यम् । बहिर्ग्रामः बहिर्देशः । मत्तो मद्यादिना । उन्मत्तो वातादिना । व्यसनी द्यूताद्यासक्तः । असम्बन्धो वादितन्नियुक्तव्यतिरिक्त उदासीनः । आदिपदादस्वतन्त्रदासपुत्रादेर्ग्रहणम् । तथा च नारदः ।
'स्वतन्त्रोऽपि हि यत्कार्य्यं कुर्य्यादप्रकृतिं गतः ।
तदप्यकृतमेवाहुरस्वातन्त्र्यस्य हेतुतः ॥
कामक्रोधाभिभूता ये भयव्यसनपीड़िताः ।
रागद्वेषपरीताश्च ज्ञेयास्त्वप्रकृतिं गताः ॥
तथा दासकृतं कार्य्यमकृतं परिचक्षते ।
अन्यत्र स्वामिसन्देशान्न दासः प्रभुरात्मनः ॥
पुत्त्रेण च कृतं कार्य्यं यत् स्यादस्वच्छन्दतः पितुः ।
तदप्यकृतमेवाहुर्दासपुत्त्रौ च तौ समौ ॥'
एतच्च कुटुम्बभरणातिरिक्तविषयम् ।
'कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं समाचरेत् ॥
स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत् ॥'
इति मनुवचनात् ।
कुटुम्बमवश्यं भरणीयम् । अध्यधीनः परतन्त्रः पुत्त्रदासादिः । व्यवहारमृणादिकम् । ज्यायान् स्वतन्त्रः । न विचालयेत् अनुमन्येतेत्यर्थः । तथा च नारदः ।
'स्वातन्त्र्यन्तु स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतम् ।
अस्वतन्त्राः प्रजाः सर्व्वाः स्वतन्त्रः पृथिवीपतिः ॥
अस्वतन्त्रः स्मृतः शिष्य आचार्य्यस्य स्वतन्त्रता ।
अस्वतन्त्राः स्त्रियः सर्व्वाः पुत्त्रा दासाः परिग्रहाः ॥
स्वतन्त्रस्तत्र तु गृही यस्य यत् स्यात् क्रमागतम् ।
गर्भस्थैः सदृशो ज्ञेयः अष्टमाद्वत्सराच्छिशुः ॥
बाल आषोड़शाद्वर्षात् पौगण्डोऽपि निगद्यते ।
परतो व्यवहारज्ञः स्वतन्त्र पितरावृते ॥
जीवतोर्न स्वतन्त्रः स्याज्जरयापि समन्वितः ।
तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात् ॥
अभावे बीजिनो माता तदभावे च पूर्व्वजः ॥'
परिग्रहाः अनुजीविप्रभृतयः । तथा च बृहस्पतिः ।
'पितृव्यभ्रातृपुत्त्रस्त्रीदासशिष्यानुजीविभिः ।
यद्गृहीतं कुटुम्बार्थे तद्गृही दातुमर्हति ॥'
कात्यायनः ।
'कुटुम्बार्थमशक्तौ तु गृहीतं व्याधितेऽथवा ।
उपप्लवनिमित्तञ्च विद्यादापत्कृतन्तु तत् ॥
कन्यावैवाहिकञ्चैव प्रेतकार्य्ये च यत् कृतम् ।
एतत् सर्व्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः ॥'
प्रभोरिति कर्त्तरि षष्ठी तेन प्रभुणा दातव्यमिति रत्नाकरः ॥ बृहस्पतिः ।
'यः स्वामिना नियुक्तोऽपि धनाय व्ययपालने ।
कुसीदकृषिवाणिज्ये निसृष्टार्थस्तु सम्मतः ॥
प्रमाणं तत्कृतं सर्व्वं लाभालाभव्ययोदयम् ।
स्वदेशे वा विदेशे वा स्वामी तन्न विसंवदेत् ॥'
तत्कृतस्य स्वामिन इत्यर्थः ।" इति व्यवहारतत्त्वम् ॥ अधिकरणविशेषः । यथा,—
"विषयो विषयश्चैव पूर्व्वपक्षस्तथोत्तरम् ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ॥"
इति स्मृतिमीमांसा ॥
न्यायमते तदभावाप्रकारकत्वे सति तत्प्रकारक-